M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 148

Title: Aitareya Brahmana
III

148

Ailāreya Brahmana III

Triteeyā Panchikā : Title

: Author

: Editor

Saka 1735 : Year, Vols.

: Publisher

148 : Remarks

॥ अथतृतीयपंचिकाप्रारंभः ॥

श्री०ऋ०

१

श्रीगणेशाय नमः ॥ ॐम् ॥ महदुक्थं वाएतद्यत्प्रउगं नव प्रातर्ग्रहा गृह्यंते नव भिर्बहिष्प
वमाने स्तुवते स्तुते स्तोमे दशमं गृह्णाति हिंकार इतरासां दशमः सोसा संमा वायव्यं
शंसति तेन वायव्यउक्थवानिंद्रं शंसति तेनैंद्रवायवऽउक्थवान्मैत्रावरुणं शंसति वायवं
तेन मैत्रावरुणऽउक्थवानाश्विनं शंसति तेनाश्विनऽउक्थवानैंद्रं शंसति तेन
शुक्रामंथिनाऽउक्थवंतौ वैश्वदेवं शंसति तेनाग्रयणऽउक्थवान्सारस्वतं शं
सति तेन सारस्वतो ग्रहोस्ति वाक्तु सरस्वती ये तु के च वाचा ग्रहा गृह्यंते तेस्य
सर्वे शस्तोक्थाऽउक्थिनो भवंति यऽएवं वेद ॥ १ ॥ अन्नाद्यं वाएतेनावरुंधेय १
त्प्रउगमन्यान्या देवताप्रऽउगे शस्यतेन्यदन्यदुक्थं प्रउगे क्रियतेन्यदन्य
दस्यान्नाद्यं गृहेषु ध्रियते यऽएवं वेदैतद्वै यजमानस्याध्यात्मतमभि

वोक्थं यत्प्रउगं तस्मादेतेनैतदुपेक्ष्यतममिवेत्याहुरेतेन ह्येनं होता संस्करोतीति वा
यव्यं शंसति तस्मादाहुर्वायुः प्राणः प्राणो रेतो रेतः पुरुषस्य प्रथमं संभवतः संभ
वतीति यद्वायव्यं शंसति प्राणमेवास्य तत्संस्करोति यदैंद्रवायवं शंसति यत्र वान प्रा
णास्तदपानो यदैंद्रवायवं शंसति प्राणापानावेवास्य तत्संस्करोति मैत्रावरुणं
शंसति तस्मादाहुश्चक्षुः पुरुषस्य प्रथमं संभवतः संभवतीति यन्मैत्रावरुणं
शंसति चक्षुरेवास्य तत्संस्करोत्याश्विनं शंसति तस्मात्कुमारं जातं संवदंतः
उपवै शुश्रूषते निवै ध्यायतीति यदाश्विनं शंसति श्रोत्रमेवास्य तत्संस्करोति यै
द्रं शंसति तस्मात्कुमारं जातं संवदंते प्रतिधारयति वै ग्रीवा अथो शिर इति
यदैंद्रं शंसति वीर्यमेवास्य तत्संस्करोति वैश्वदेवं शंसति तस्मात्कुमारो जा

श्री०ऐ०
२

तःपश्चैवप्रचरतिवैश्वदेवानिसूक्तानियद्वैश्वदेवंशंसत्यंगान्येवास्यतत्संस्करोतिसार
स्वतंशंसतितस्मात्कुमारंजातंजघन्यावागाविशतिवाग्घिसरस्वतीयत्सारस्वतंशं
सतिवाचमेवास्यतत्संस्करोत्येषवैजातोजायतेसर्वेभ्यएताभ्योदेवताभ्यः
सर्वेभ्यउक्थेभ्यःसर्वेभ्यश्छंदोभ्यःसर्वेभ्यःप्रउगेभ्यःसर्वेभ्यःसवनेभ्योय
एवंवेदयस्यचैवंविदुषएतच्छंसंति॥२॥प्राणानांवाएतदुक्थंयत्प्रउगंस
प्तदेवताःशंसतिसप्तवैशीर्षन्प्राणाःशीर्षन्नेवतत्प्राणान्दधातिकिंसयजमा
नस्यपापभद्रमाद्रियेतेतिहस्माहयोस्यहोतास्यादित्यत्रैवैनंयथाकामयेत
तथाकुर्याद्यंकामयेतप्राणेनैनंव्यर्धयानीतिवायव्यमस्यलुब्धंशंसेदृचं २
वापदंवातीयात्तेनैवतल्लुब्धंप्राणेनैवैनंतद्व्यर्धयतियंकामयेतप्राणापाना

भ्यामेनंव्यर्धयानीत्यैंद्रवायवमस्यलुब्धंशंसेदृचंवापदंवातीयात्तेनैवतल्लुब्धंप्राणापाना
भ्यामेवैनंतद्व्यर्धयतियंकामयेतचक्षुषैनंव्यर्धयानीतिमैत्रावरुणमस्यलुब्धंशंसे
दृचंवापदंवातीयात्तेनैवतल्लुब्धंचक्षुषैवैनंतद्व्यर्धयतियंकामयेतश्रोत्रेणैनंव्यर्ध
यानीत्याश्विनमस्यलुब्धंशंसेदृचंवापदंवातीयात्तेनैवतल्लुब्धंश्रोत्रेणैवैनंतद्व्य
र्धयतियंकामयेतवीर्येणैनंव्यर्धयानीत्यैंद्रमस्यलुब्धंशंसेदृचंवापदंवातीयात्ते
नैवतल्लुब्धंवीर्येणैवैनंतद्व्यर्धयतियंकामयेतांगैरेनंव्यर्धयानीतिवैश्वदेव
मस्यलुब्धंशंसेदृचंवापदंवातीयात्तेनैवतल्लुब्धमंगैरेवैनंतद्व्यर्धयतियंकाम
येतवाचैनंव्यर्धयानीतिसारस्वतमस्यलुब्धंशंसेदृचंवापदंवातीयात्तेनैवतल्लु
ब्धंवाचैवैनंतद्व्यर्धयतियमुकामयेतसर्वैरेनमंगैःसर्वेणात्मनासमर्धयानी

ब्रा०त० स्तेतदेवास्ययथापूर्वमनूक्तंशंसेत्सवैरेवैनंतदंगैः सर्वेणात्मनासमर्धयतिसर्वैरंगैः
सर्वेणात्मनासमृध्यतेयऽएवंवेद॥३॥तदाहुर्यथावावस्तोत्रमेवंशस्त्रमाग्नेयीषु
३ सामगास्तुवतेवायव्ययाहोताप्रतिपद्यतेकथमस्याग्नेय्योनुशस्ताभवंतीत्यग्नि
सर्वा र्वाएतास्तन्वोयदेतादेवताःसयदग्निःप्रवानिवदहतितदस्यवायव्यंरूपंतदस्य
तेनानुशंसत्यथयद्द्वेधमिववत्वादहतिद्वौवाइंद्रवायूतदस्यैंद्रवायवंरूपंतद
स्यतेनानुशंसत्यथयदुच्चैर्हृष्यतिनिचहृष्यतितदस्यमैत्रावरुणंरूपंतदस्य
तेनानुशंसतिसयदग्निर्घोरसंस्पर्शस्तदस्यवारुणंरूपंतंयद्घोरसंस्पर्शंसं ३
तंमित्रकृत्येवोपासतेतदस्यमैत्रंरूपंतदस्यतेनानुशंसत्यथयदेनंद्वाभ्यांबाहुभ्यां
द्वाभ्यामरणीभ्यांमंथंतिद्वौवाऽअश्विनौतदस्याश्विनंरूपंतदस्यतेनानुशंसत्य

थयदुच्चैर्घोषस्तनयन्बबाकुर्वन्निवदहतियस्माद्भूतानिबिजंतेतदस्यैंद्रंरूपंतदस्यतेना
नुशंसत्यथयदेनमेकंसंतंबहुधाविहरंतितदस्यवैश्वदेवंरूपंतदस्यतेनानुशंसत्यथ
यत्स्फूर्जयन्वाचमिववदन्दहतितदस्यसारस्वतंरूपंतदस्यतेनानुशंसत्येवमुहास्यवाय
व्ययैवप्रतिपद्यमानस्यतृचेनतृचेनैवैताभिर्देवताभिस्तोत्रियोनुशस्तोभवतिविश्वेभिः
सोम्यंमध्वग्नइंद्रेणवायुना॥पिबामित्रस्यधामभिरितिवैश्वदेवमुक्थंशस्त्वावैश्व
देव्यायजतियथाभागंतद्देवताःप्रीणाति॥४॥देवपात्रंवाएतद्यद्वषट्कारोवषट्कारो
तिदेवपात्रेणैवतद्देवतास्तर्पयत्यनुवषट्करोतितद्यथादोऽश्वान्वागावापुनरभ्याका
रंतर्पयंत्येवमेवैतद्देवताःपुनरभ्याकारंतर्पयंतियदनुवषट्करोतीमानेवाग्नीनुपा

ब्रा०म० सतद्सार्द्धंध्यानथकस्मात्पूर्वस्मिन्नेवनुक्तातिपूर्वस्मिन्वषट्कुर्वंतीतियदेवसोमस्या
ग्नेवीहीत्यनुवषट्करोतितेनधिष्ण्यान्प्रीणात्यसंस्थितान्सोमान्भक्षयंतीत्याहु
४ र्येषांनानुवषट्करोतिकोनुसोमस्यस्विष्टकृद्भागइतियद्वावसोमस्याग्नेवीही
त्यनुवषट्करोतितेनैवसंस्थितान्सोमान्भक्षयंतिसऽउएवसोमस्यस्विष्टकृद्भागो
वषट्करोति॥५॥वज्रोवाएषयद्वषट्कारोयंद्विष्यात्तंध्यायेद्वषट्करिष्यंस्तस्मिन्नेव
तंवज्रमास्थापयतिषळितिवषट्करोतिषड्वाऋतवऋतूनेवतत्कल्पयत्यृतून्प्रतिष्ठा
पयत्यृतून्वैप्रतितिष्ठतइदंसर्वमनुप्रतितिष्ठतियदिदंकिंचप्रतितिष्ठतियऽए
वंवेदतदुहस्माहहिरण्यदन्वैदऽएतानिवाऽएतेनवषट्प्रतिष्ठापयतिद्यौरंत ४
रिक्षेप्रतिष्ठितांतरिक्षंपृथिव्यांपृथिव्यप्स्वापःसत्येसत्यंब्रह्मणिब्रह्मतपसी

सैताएवतत्प्रतिष्ठाःप्रतितिष्ठंतीरिदंसर्वमनुप्रतितिष्ठतियदिदंकिंचप्रतितिष्ठतियऽएवंवेदवौ
षळितिवषट्करोत्यसौवाववावृतवःषळेतमेवतदृतुष्वादधात्यृतुषुप्रतिष्ठापयतियादृ
ग्घावैदेवेभ्यःकरोतितादृगिवास्मैदेवाःकुर्वंति॥६॥त्रयोवैवषट्कारावज्रोधामच्छद्रि
क्तःसयमेवोच्चैर्बलिवषट्करोतिसवज्रःस्तंतंप्रहरतिद्विषतेभ्रातृव्यायवधंयोस्यस्तृ
त्यस्तस्मैस्तर्तवैतस्मात्सभ्रातृव्यवतावषट्कृत्योथयःसंततोनिर्हाणर्चःसधामच्छत् समः
तंतंप्रजाश्चपशवश्चानूपतिष्ठंतेतस्मात्सप्रजाकामेनवषट्कृत्योथयेनैववषट्कृत्व पशुकामेन
राध्नोतिसरिक्तोरिणन्त्यात्मानंरिणक्तियजमानंपापीयान्वषट्कर्त्ताभवतिपापी
यान्यस्मैवषट्करोतितस्मात्तस्याशान्तेयाल्किंसयजमानस्यपापभद्रमाद्रियेतेति
हस्माहयोस्यहोतास्यादित्यत्रैवैनंयथाकामयेततथाकुर्याद्यंकामयेततथैवानीजा

ब्रा०त० नोभूत्तथैवेजानस्यादितियथैवास्यऋचंब्रूयात्तथैवास्यवषट्कुर्यात्सद्दशमेवैनंतत्करोति
यंकामयेतपापीयान्त्स्यादित्युच्चैस्तरामस्यऋचमुक्त्वाशनैस्तरांवषट्कुर्यात्पापीयांस
५ मेवैनंतत्करोतियंकामयेतश्रेयान्त्स्यादितिशनैस्तरामस्यऋचमुक्त्वोच्चैस्तरांवष
ट्कुर्याच्छ्रियऽएवैनंतच्छ्रियामादधातिसंततमृचावषट्कृत्यंसंतत्यैसंधीयतेप्रज
यापशुभिर्यऽएवंवेद॥ ७ ॥यस्यैदेवतायैहविर्गृहीतंस्यात्तांध्यायेद्वषट्करिष्यन्त्सा
क्षादेवतद्देवतांप्रीणातिप्रत्यक्षाद्देवतांयजतिवज्रोवैवषट्कारःसएषप्रहृतोऽशां
तोदीदायतस्यहैतस्यनसर्वइवशांतिंवेदनप्रतिष्ठांतस्माद्धाप्येतर्हिभूयानिवमृ ५
त्युस्तस्यह्येषैवशांतिरेषाप्रतिष्ठावागितिसैवतस्माद्वषट्कृत्यवषट्कृत्यवागित्यनु
मंत्रयेतसऽएनंशांतोनहिनस्तिवषट्कारमामांप्रमृक्षोमाहंत्वांप्रमृक्षंबृहता

प मनउपह्वयेव्यानेनशरीरंप्रतिष्ठासिप्रतिष्ठांगच्छप्रतिष्ठांमागमयेतिवषट्कारमनुमंत्रयेततदु ष
हस्माहदीर्घमेतत्सदप्रस्वोजःसहऽओजदूलेववषट्कारमनुमंत्रयेतौजश्चहवैसहश्च
ष वषट्कारस्यप्रियतमेतन्वौप्रियेणैवैनंतद्धाम्नासमर्धयतिप्रियेणधाम्नासमृध्यते
यऽएवंवेदवाक्चवैप्राणापानौचवषट्कारस्तएतेवषट्कृतेवषट्कृतेव्युत्क्रामंतिता
ननुमंत्रयेतवागोजःसहऽओजोमयिप्राणापानावितिव्युत्क्रामन्त्येवतद्धोतावाचंचप्रा
णापानौचप्रतिष्ठापयतिसर्वायुःसर्वायुत्वायसर्वमायुरेतियऽएवंवेद॥ ८ ॥यज्ञो
वैदेवेभ्यऽउदक्रामत्तंप्रैषैःप्रैषमैच्छन्यत्प्रैषैःप्रैषमैच्छंस्तत्प्रैषाणांप्रैषत्वंतंपुरो
रुग्भिःप्रारोचयन्यत्पुरोरुग्भिःप्रारोचयंस्तत्पुरोरुचांपुरोरुक्त्वंतंवेद्यामन्वविंद यं
द्वेद्यामन्वविंदंस्तद्वेदेर्वेदित्वंतंवित्तंग्रहैर्व्यगृह्णततयद्वित्तंग्रहैर्व्यगृह्णततत्तद्ग्रहाणां॥
ग्रहत्वंतंवित्वानिविद्भिर्न्यवेदयन्यद्वित्वानिविद्भिर्न्यवेदयंस्तन्निविदांनिवित्त्वंमह

ब्रा०द० द्वा व नष्टैष्यभ्यं स्वं वेच्छतीयतरो वा वतयोर्ज्यो पद्वा भीष्छति स ऽ एव तयोः साधीय ऽ इष्ट
तिय ऽ उ एवं श्रेषान्वर्षीयसो वर्षश्यसो वेद स ऽ उ एव तान्त्साधीयो वेद नष्टैष्यं तास
६ तद्यस्त्रैषांस्तस्मात्स क्षुस्तिष्ठन्त्रेष्यति ॥ ९ ॥ गर्भा वा ऽ एत ऽ उक्थानां यन्निविदः स्त
सुरस्तादुक्थानां प्रातः सवने धीयंते तस्मात्परांचो गर्भा धीयंते परांचः संभवंति य
न्मध्यतो मध्यंदिने धीयंते तस्मान्मध्ये गर्भा धृता यदंततः स्तृतीयसवने धीयंते त
स्मादमुतोर्वांचो गर्भाः प्रजायंते प्रजात्से प्रजायते प्रजया पशुभिर्य ऽ एवं वेद पेशा
वा ऽ एत ऽ उक्थानां यन्निविदः तद्यत्पुरस्तादुक्थानां प्रातः सवने धीयंते यथैव प्रवय
णतः पेशः कुर्यात्तादृक्तद्यन्मध्यतो मध्यंदिने धीयंते यथैव मध्यतः पेशः कुर्यात्तादृ ६
क्तद्यदंततस्तृतीयसवने धीयंते यथैवावयज्ञानतः पेशः कुर्यात्तादृक्तत्सर्वतो
यज्ञस्य पेशः सांशो भनते य ऽ एवं वेद ॥ १० ॥ सौर्या वा ऽ एता देवता यन्निविदस्तद्य

त्पुरस्तादुक्थानां प्रातः सवने धीयंते मध्यतो मध्यंदिनें ततस्तृतीयसवने ऽ आदित्यस्यै
वतद्व्रतमनुपर्यावर्तंते पच्छो वै देवा यज्ञं समभरंस्तस्मात्पच्छो निविदः शस्यंते यद्वैतद्दे
वा यज्ञं समभरंस्तस्मादश्वः समभवत्तस्मादाहुरश्वं निविदां शंस्त्रेदयादिति तदु
खलु वरमेव ददतिन निविदः पदमतीयाद्यन्निविदः पदमतीयाद्यज्ञस्य तच्छिद्रं कु
र्याद्यज्ञस्य वै छिद्रं स्रवद्यजमानोनुपापीयान्भवति तस्मान्न निविदः पदमतीयान्न नि
बि विदः पदे विपरिहरेद्यन्निविदः पदे विपरिहरेन्मोहयेद्यज्ञं मुग्धो यजमानस्यात्तस्मा
न्न निविदः पदे विपरिहरेन्न निविदः पदे समस्येद्यन्निविदः पदे समस्येद्यज्ञस्य
तदायुः संहरेत्प्रमायुको यजमानस्यात्तस्मान्न निविदः पदे समस्येत्सेदं ब्रह्मेदं
क्षत्रमित्येते ऽ एव समस्येद्ब्रह्मक्षत्रयोः संश्रित्यै तस्माद्ब्रह्म च क्षत्रं च संश्रिते न त

श्रौ०ह० चंनंचतुर्थंचमतिमन्येतंनिविद्धानमेकैकंवैनिविदःपदमं चंसूक्तंप्रतितस्मान्नतच्चं
नचतुर्थंचमतिमन्येतंमिविद्धानंनिविदाह्येवस्तोत्रमतिशस्त्तंनवसैकांपरिशि
२ ष्यतृतीयसवनेनिविदंदध्याद्यद्धेपरिशिष्यदध्यात्स्त्रजननंतदुपहन्याद्भूमैस्त
स्त्रजाव्यर्द्धुयेत्तस्मादेकामेवपरिशिष्यतृतीयसवनेनिविदंदध्यान्नसूक्तेननि
त विदमतिपद्येतयेनसूक्तेननिविदमतिपद्येनतत्पुनरूपनिवर्ततेतवास्तुरूमे
वतदन्यत्तद्देवतंतछंदसंसूक्तमाहृत्यंतस्मिन्निविदंदध्यान्मा प्रगामपथो
वयमितिपुरस्तात्सूक्तस्यशंसतिपथोवाएषप्रैतियोयज्ञेमुह्यतिमायज्ञादिंद्रसो
मिनद्रतियज्ञादेवतंनप्रच्यवतेमांतस्थुर्नोऽअरातयइत्यरातीयतःऽएवतदपहं ७
तियोयज्ञस्यप्रसाधनस्तंतुर्देवेष्वाततं॥तमाहुतंनशीमहीतिप्रजावैतंतुःप्र

जामिवास्माएतत्संतनोतिमनोन्वाहुवामहेनाराशंसेनसोमेनेतिमनसावैयज्ञस्तायते
मनसाक्रियतेसैवतत्रप्रायश्चित्तिःप्रायश्चित्तिः॥११॥इतितृतीयपंचिकायांप्रथ०॥
देवविशःकल्पयितव्याऽइत्याहुश्छंदश्छंदसिप्रतिष्ठाप्यमितिशोंसावोमित्याह्व
यतेप्रातःसवनेत्र्यक्षरेणशंसामोदैवोमित्यध्वर्युःप्रतिगृणातिपंचाक्षरेणतदष्टा
क्षरंसंपद्यतेष्टाक्षरावैगायत्रीगायत्रीमेवतत्पुरस्तात्प्रातःसवनेचीकॢपतामुक्थं
वाचीत्याहशास्त्वोचतुरक्षरमोमुक्थशाऽइत्यध्वर्युश्चतुरक्षरंतदष्टाक्षरंसंपद्यतेष्टा
क्षरावैगायत्रीगायत्रीमेवतदुभयतःप्रातःसवनेचीकॢपतामध्वर्योशोंसावोमि
त्याह्वयतेमध्यंदिनेषळक्षरेणशंसामोदैवोमित्यध्वर्युःप्रतिगृणातिपंचाक्षरेण
तदेकादशाक्षरंसंपद्यतऽएकादशाक्षरावैत्रिष्टुप्त्रिष्टुभमेवतत्पुरस्तान्मध्यंदि
नेचीकॢपतामुक्थंवाचीन्द्रायेत्याहशास्त्वामु[illegible]न्द्रायेत[illegible]सप्ताक्ष

ब्रा०त० रमोमुक्थशाह स्त्वध्वर्युश्चतुरक्षरं तदेकादशाक्षरं संपद्य[illegible]कादशा[illegible]पुत्रिष्टुभ
मेवतदुभयतो मध्यंदिने चीक्लृपताम् अध्वर्यो शोंशोंसावोमित्याह्वयते तृतीयसवने
८ सप्ताक्षरेणाशंसामोदेवोमित्यध्वर्युः प्रतिगृणाति पंचाक्षरेण तद्द्वादशाक्षरं संपद्यते
द्वादशाक्षरा वै जगती जगतीमेव तत्पुरस्तात्तृतीयसवने चीक्लृपतामुक्थं वाचीद्रा
य देवेभ्य इत्याह शस्त्वैकादशाक्षरमोमित्यध्वर्युरेकाक्षरं तद्द्वादशाक्षरं संपद्यते द्वा
दशाक्षरा वै जगती जगतीमेव तदुभयतः स्तृतीयसवने चीक्लृपतां तदेतदृषिः
पश्यन्नभ्यनूवाच यद्गायत्रे अधिगायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ॥
यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुरिति तेह्वेतच्छंदश्छंदसि ८
प्रतिष्ठापयति कल्पयति देवविशो य एवं वेद ॥ १२ ॥ प्रजापतिर्वै यज्ञं छंदांसि

५ देवेभ्यो भागधेयानि व्यभजत्स गायत्रीमेवाग्नये वसुभ्यः प्रातःसवनेभजत्त्रिष्टुभमिंद्राय
रुद्रेभ्यो मध्यंदिने जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यस्तृतीयसवनेथास्य यत्स्वं
छंद आसीदनुष्टुप् तामुदंतमभ्युदौहदच्छावाकीयामभि सैनमब्रवीदनुष्टुप् त्व
न्वेव देवानां पापिष्ठोसि यस्य तेहं स्वं छंदोस्मि यां मोदंतमभ्युदौहीरच्छावाकीया
मभीति तदजानात्स स्वं सोममाहरत्स स्वे सोमेग्रं मुखमभिपर्याहरदनुष्टुभं त
स्माद्वनुष्टुब् अग्रियामुख्या युज्यते सर्वेषां सवनानामग्रियो मुख्यो भवति श्रेष्ठ
तामश्नुते य एवं वेद स्वे वै स तत्सोमे कल्पयत्तस्माद्यत्र क्व च यजमानवशो भ
वति कल्पत एव यज्ञोपि तस्यै जनतायै कल्पते यत्रैवं विद्वान्यजमानो वशी
यजते ॥ १३ ॥ अग्निर्वै देवानां होतासीत्तं मृत्युर्बहिष्पवमानेसीदत्सोनुष्टु

श्रा०तृ०
१

माऽध्यंप्रत्यपद्यतमस्तुमेवतत्पर्यक्रामत्तंमाध्येसीदत्सप्रउगेणप्रत्यपद्यतमस्तु
मेवतत्पर्यक्रामत्तंमाध्यंदिनेपवमानेसीदत्सोनुष्टुभामरुत्वतीयंप्रत्यपद्यत
मस्तुमेवतत्पर्यक्रामत्तंमाध्यंदिनेबृहतीषुनाशक्नोत्तंचतुंप्राणावैबृहत्यः
प्राणानेवतंनाशक्नोच्छ्यवैतुंतस्मान्माध्यंदिनेहोताबृहतीषुस्तोत्रियेणैवप्र
तिपद्यतेप्राणावैबृहत्यःप्राणानेवतदभिप्रतिपद्यतेतंतृतीयपवमानेसी
दत्सोनुष्टुभावैश्वदेवंप्रत्यपद्यतमस्तुमेवतत्पर्यक्रामत्तंयज्ञाययज्ञीयेसी
दत्सवैश्वानरीयेणाग्निमारुतंप्रत्यपद्यतमस्तुमेवतत्पर्यक्रामदुक्थ्योवैवैश्वा ९
नरीयंप्रतिष्ठायज्ञाययज्ञीयंवजोणेवतत्प्रतिष्ठायामस्तुंनुदतेससर्वान्याधा
त्सर्वान्स्त्याणून्मस्योरतिमुच्यस्वस्स्येवहोतोन्मुच्यतेसर्वायुःसर्वायुत्वायस
स्वस्स्येवोदमुच्यते

र्वमायुरेतियऽएवंवेद॥१४॥इंद्रोवैवृत्रंहत्वानास्तृषीतिमन्यमानःपराःपरावतोगच्छ
त्सपरमामेवपरावतमगच्छदनुष्टुब्वैपरमापरावद्वाग्वाऽअनुष्टुप्सवाचंप्रविश्याशे
यत्तंसर्वाणिभूतानिविभज्यान्वैच्छंस्तंपूर्वेद्युःपितरोविंदन्नुत्तरमहर्देवास्तस्मात्पू
र्वेद्युःपितृभ्यःक्रियतऽउत्तरमहर्देवान्यजंतेतेब्रुवन्नभिषुणवामेवतथावावनऽ
आविश्छमागमिष्यतीतितथेतितेभ्यषुण्वंस्तऽआत्वारथंयथोतयऽइत्येवैन
मावर्तयन्निदंवसोसुतमंधऽइत्येवैभ्यःसुतकीर्त्यामाविरभवदिंद्रनेदीयऽएदि
हीत्येवैनंमध्यंप्रापादयंतागतेंद्रेणयज्ञेनयजंतेसेंद्रेणयज्ञेनराध्नोतियऽएवंवेद॥१५॥
इंद्रंवैवृत्रंजघ्निवांसंनास्तृतेतिमन्यमानाःसर्वादेवताऽअजहुस्तंमरुतएवस्वा
पयोप्राणाहैवैनंतंनाजहुस्तस्मादेषोच्युतःस्वापिमान्प्रगाथःशस्यतऽआस्वा
नाजहुःप्राणावैमरुतःस्वापयः

ब्रा०त० पेस्वापिभिरित्यपिह यद्येंद्रमेवातऽऐंद्रंछंदः शस्यतेतद्धसर्वंमरुत्वतीयंभवत्येषचेदच्युतः
१० स्वापिमान्प्रगाथः शस्यतऽआस्वापेस्वापिभिरिति ॥१६॥ ब्राह्मणस्पत्यंप्रगाथं
शंसतिबृहस्पतिपुरोहितावैदेवाऽअजयन्स्वर्गंलोकंव्यस्मिंल्लोकेऽजयंततथैवैतद्य
जमानोबृहस्पतिपुरोहितऽएवजयतिस्वर्गंलोकंव्यस्मिंल्लोकेजयतेतौवाऽएतौप्र
गाथ्यावस्तुतौसंतौपुनरादायंशस्येतेतदाहुर्यन्नकिंचनास्तुतंससुनरादायंश
स्यतेयथकस्मादेतौप्रगाथावस्तुतौसंतौपुनरादायंशस्येतेइतिपवमानोक्थंवाऽएतद्य
न्मरुत्वतीयंषट्सुवाऽअत्रगायत्रीषुस्तुवतेषट्सुबृहतीषुतिसृषुत्रिष्टुप्सुसवाऽ
एषत्रिछंदाः पंचदशोमाध्यंदिनः पवमानस्तद्दाहुः कथंतऽएषत्रिछंदाः पंचदशो
माध्यंदिनः पवमानोनुशस्तोभवतीतियेऽएवगायत्र्याऽउत्तरेप्रातिपदोयोगायत्रो १०
नुचरस्ताभिरेवास्यगायत्र्योनुशस्ताभवंत्येतान्यामेवास्यप्रगाथान्यांबृहत्योनु

शस्ताभवंतितास्कवाऽएतास्कबृहतीषुसामगायंतिरवयोधाजयाभ्यांपुनरादायं
स्कवतेतस्मादेतौप्रगाथावस्तुतौसंतौपुनरादायंशस्येतेतछस्त्रेणस्तोत्र
मन्वैतियेएवत्रिष्टुभोधाय्येयत्रैष्टुभंनिविद्धानंताभिरेवास्यत्रिष्टुभोनुशस्ता
भवंत्येवमुहास्यैषत्रिछंदाः पंचदशोमाध्यंदिनः पवमानोनुशस्तोभवति
यएवंवेद ॥१७॥ धाय्याः शंसतिधाय्याभिर्वैप्रजापतिरिमांल्लोकानधय
द्यंयंकाममकामयततथैवैतद्यजमानोधाय्याभिरेवेमांल्लोकान्धयतियं
यंकामंकामयतेयएवंवेदयद्देवधाय्या ३: ॥ यत्रयत्रवैदेवायज्ञस्यछिद्रं
निरजानंस्तद्धाय्याभिरपिदधुस्तद्धाय्यानांधाय्यात्वमछिद्रेणहास्य
यज्ञेनेष्टंभवतियएवंवेदयद्देवधाय्या ३: ॥ स्यूमहेतद्यज्ञस्यधाय्यास्त

ब्रा॰ऐ॰ घयास्त्र्यावासःसंदधदियादेवमेवैताभिर्यज्ञस्यछिद्रंसंदधदेतियएवंवेद
यद्वेवधाय्यां३ः॥तान्युवाऽएतान्युपसदामेवोक्थानियद्धाय्याऽअग्निर्नेतेत्या
११ ग्नेयीप्रथमोपसत्तस्याऽएतदुक्थंत्वंसोमक्रतुभिरितिसौम्याद्वितीयोपसत्त
स्याऽएतदुक्थंपिन्वंत्यपइतिवैष्णवीतृतीयोपसत्तस्याऽएतदुक्थंयावंत
द्वैसौम्येनाध्वरेणेष्ट्वालोकंजयतितमतऽएकैकयोपसदाजयतियएवंवेद
यश्चैवंविद्वान्धाय्याःशंसतितद्धैकऽआकुस्तान्वोमहऽइतिशंसंदेतांवाव
वयंभरतेषुशस्यमानामभिव्यजानीमऽइतिवदंतस्तत्तन्नाहत्यंयदेनांशं
सेदीश्वरःपर्जन्योवृष्टोःपिन्वंत्यपऽइत्येवत्रांसेद्वृष्टिवनिपदंमरुतऽइतिमा
रुतंमत्यंनमिहेविनयंतीतिविनीतवद्यद्विनीतवत्तद्विक्रांतवद्यद्विक्रांत ११

वत्तद्वैष्णवंवाजिनमितींद्रोवैवाजीतस्यांवाऽएतस्यांचत्वारिपदानिवृष्टिवनि
मारुतंवैष्णवमैंद्रंसावाऽएषातृतीयसवनभाजनासतीमध्यंदिनेशस्यतेत
स्मादिदंभरतानांपशवःसायंगोष्ठाःसंतोमध्यंदिनेसंगविनीमायंतिसा
जगतीजागताहिपशवऽआत्मायजमानस्यमध्यंदिनस्तद्यजमानेपशून्
दधाति॥१८॥मरुत्वतीयंप्रगाथंशंसतिपशवोवैमरुतःपशवःप्रगा
थःपशूनामवरुध्यैजनिष्ठाऽउग्रःसहसेतुरायेतिसूक्तंशंसतितद्वाऽए
तद्यजमानजननमेवसूक्तंयजमानंह्वाऽएतेनयज्ञाद्देवयोन्यैप्रजनय
तितत्संजयंभवतिसचजयतिविचजयतऽएतद्वैगौरिवीतंगौरिवीतिर्हवै
शाक्त्योनेदिष्ठंस्वर्गस्यलोकस्यागच्छत्सऽएतत्सूक्तमपश्यत्तेनस्वर्गंल्लो

ब्रा०त
१२

कम्जयन्नथैवैतघजमानःऽएतेनसूक्तेनस्वर्गंलोकंजयतीतितस्यार्धीःशास्त्वार्धीः
परिविशध्यमध्येनिविद्दधातिस्वर्गस्यहैषलोकस्यरोहायंनिवित्स्वर्गस्यहै
तल्लोकस्याक्रमणंयंनिवित्ताभाक्रममाणऽइवन्नांसेदुपैवयजमानंनिग्र
हीतयोस्यप्रियःस्यादितिनुस्वर्गकामस्याथापिचरतोयःकामयेतक्षत्रे
णविन्नांहन्यामितित्रिस्तर्हिनिविदास्सूक्तंविशंसेत्क्षत्रंवैनिविद्विट्सूक्तं
क्षत्रेणैवतद्विशंहंतियःकामयेतविशाक्षत्रंहन्यामितित्रिस्तर्हिसूक्तेन
निविदंविशंसेत्क्षत्रंवैनिविद्विट्सूक्तंविशैवतत्क्षत्रंहंतियऽउकामयेतो
भयतःएनंविशःपर्यवच्छिनदानीस्यभयतस्तर्हिनिविदंव्याहयीतोभ
यतःऽएवैनंतद्विशःपर्यवच्छिनत्तीतिन्वापिचरतःऽइतरथात्वेवस्वर्गका १२

मस्यैवयःसुपर्णाऽउपसेदुरिंद्रमित्युत्तमयापरिदधातिप्रियमेधाऋषयोनाधमानाः।।अ
पध्वांतमूर्णुहीतियेनतमसाप्रावृतोमन्येततमनसागच्छेदपहैवास्मात्तल्लुप्यतेपूर्धि
चक्षुरितिचक्षुषीमरीमृज्येताजरसंहचक्षुष्मान्भवतियःएवंवेदमुमुग्ध्यस्मान्नि
धयेवबद्धानितिपाशाद्वैनिधामुमुग्ध्यस्मान्पाशादिवबद्धानित्येवतदाह।।१९।।
इंद्रोवैवृत्रंहनिष्यन्त्सर्वादेवताऽअब्रवीदनुमोपतिष्ठध्वमुपमाह्वयध्वमितितथे
वै तितंहनिष्यंतःऽआद्रवन्सोवेदमांहनिष्यंतऽआद्रवंतिहंतेमाभीषयाऽइतितानभि
प्राश्वसीत्तस्यश्वसथादीषमाणाविश्वेदेवाःऽअद्रवन्मरुतोहैनंनाजहुःप्रहरभग
वोजहिवीरयस्वेत्येवैनमेतांवाचंवदंतऽउपातिष्ठंततदेतदृषिःपश्यन्नभ्यनूवा
चवृत्रस्यत्वाश्वसथादीषमाणाविश्वेदेवाऽअजहुर्येसखायः।।मरुद्भिरिंद्रसख्यं
तेअस्त्वथेमाविश्वाःपृतनाजयासीतिसोवेदिमेवैकिलमेसचिवाऽइमेमाकाम

श्रा०ब० यं तद्हंते मा न स्मिन्नुक्थ ऽआभजा इति तानेतस्मिन्नुक्थ ऽआभजन्देथ हैते तस्युभे ऽए
१२ वानिष्केवल्ये ऽउक्थे ऽआसतुर्मरुत्वतीयं ग्रहं गृह्णाति मरुत्वतीयं प्रगाथं शंसति मरुत्व
तीयं सूक्तं शंसति मरुत्वतीयां निविदं दधाति मरुत्वतीयां सामर्चि मरुत्वतीयमुक्थं शस्त्वाम
रुत्वतीयया यजति यथा भागं तद्देवताः प्रीणाति ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे ह
रिवो ये गविष्टौ ॥ ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिरिति यत्र यत्रैव
भिर्व्यजयत यत्र यत्र वीर्यमकरोत्तदेवैतत्समनुवेद्येन्द्रेणैनांत्सोमपीथान्करोति ॥ २० ॥
इन्द्रो वै वृत्रं हत्वा सर्वा विजितीर्विजित्याब्रवीत्प्रजापतिमहमेतदसानि यत्त्वमहं महा
नसानीति स प्रजापतिरब्रवीदथ कोऽहमिति यदेवैतदवोच इत्यब्रवीत्ततो वै को नाम प्र
जापतिरभवत्को वै नाम प्रजापतिर्यन्महानिन्द्रोऽभवत्तन्महेन्द्रस्य महेन्द्रत्वं स महा १३
न्भूत्वा देवता ऽअब्रवीदुद्धारं म ऽउद्धरतेति यथाप्येतर्हि श्रेष्ठ इति यो वै भवति यः श्रेष्ठ

तामश्नुते स महान्भवति तं देवा ऽअब्रुवन्त्स्वयमेव ब्रूष्व यत्ते भविष्यतीति स ऽएतं माहेन्द्रं ग्रहम
ब्रूत माध्यंदिनं सवनानां निष्केवल्यमुक्थानां त्रिष्टुभं छन्दसां पृष्ठं साम्नां तमस्मा ऽउद्धार
मुद्धरन्नुदस्मा ऽउद्धारं हरन्ति य ऽएवं वेद तं देवा ऽअब्रुवन्त्सर्वं वा ऽअवोचथा ऽअपि नोऽत्रा
स्त्विति स नेत्यब्रवीत्कथं वोऽपि स्यादिति तमब्रुवन्नप्येव नोऽस्तु मघवन्निति तान्नीक्षत एव ॥ २१ ॥
ते देवा ऽअब्रुवन्नियं वा ऽइन्द्रस्य प्रिया जाया वावाता प्रासहा नामास्यामेवेच्छामहा इति
तथेति तस्यामैच्छन्त सैनानब्रवीत्प्रातर्वः प्रतिवक्तास्मीति तस्मात्स्त्रियः पत्याविच्छन्ते
तस्मादुस्त्र्यनुरात्रं पत्याविच्छते तां प्रातरुपायंस्तै तदेव प्रत्यपद्यत यद्धावान पुरुतमं
पुराषाळा वृत्रहेन्द्रो नामान्यप्राः ॥ अचेति प्रासहस्पतिस्तुविष्मानिति इन्द्रो वै प्रासहस्प
तिस्तुविष्मान्यदीमुश्मसि कर्तवे करत्तदिति यदेवैतदवोचामा करत्तदित्येवैनांस्तदब्र
वीत्ते देवा ऽअब्रुवन्नप्यस्या ऽइहास्तु या नोऽस्मिन्नवेकमविददिति तथेति तस्या ऽअप

श्री०ब्रा० त्राकुर्वंस्तस्मादेषात्रापि शस्यते य ह्यावानपुरुतमं पुराषाळ्ळितिसेनावाइंद्रस्य प्रियाजा
याबावाताप्रासहानामकोनामप्रजापतिःश्वशुरस्तद्यास्यकामेसेनाजये तस्याःअ
१४ ह्रीत्तिषंस्तृणमुभयतःपरिछिद्यैतरांसेनामभ्यस्येत्प्रासहेकस्त्वापश्यतीतितद्य
थैवादस्नुषाःश्वशुराल्लज्जमानानिलीयमानैत्येवमेवसासेनाभज्यमानानिली
यमानैतियत्रैवंविद्वांस्तृणमुभयतःपरिछिद्येतरांसेनामभ्यस्यतिप्रासहेकस्त्वा
पश्यतीतितानिंद्रउवाचापिवोत्रास्त्विति ते देवाऽअब्रुवन्विराड्याज्यास्तुनिष्केव १४
ल्यस्यया त्रयस्त्रिंशदक्षरा॥त्रयस्त्रिंशद्वैदेवाऽअष्टौवसवएकादशरुद्राद्वादशा
दित्याः प्रजापतिश्च वषट्कारश्च देवताऽअक्षरभाजः करोत्यक्षरमक्षरमेव तद्देवताऽ
अनुप्रपिबंति देवपात्रेणैव तद्देवतास्तर्प्यंति यं कामयेतानायतनवान्त्स्यादितिस
विराजास्य यजेद्गायत्र्या वा त्रिष्टुभा वान्येन वा छंदसा वषट्कुर्यादनायतनवं

जिः समभवद्यत्तिसृभिः समभवत्तस्मात्तिसृभिस्तुवंति तिसृभिरुद्गायंतितिसृ
तमेवैनं तत्करोति यं कामयेतायतनवान्त्स्यादिति विराजास्य यजेत्पिबासोममिंद्र मंद
तु त्वेत्यायतनवंतमेवैनं तत्करोति॥२२॥ ऋक्च वाऽइदमग्रे साम चास्तां सैव नाम
र्गासीदमो नाम साम सा वाऽऋक्सामोपावदन्मिथुनं संभवाव प्रजात्याऽइति नेत्यब्र
वीत्साम ज्यायान्वाऽअतो मम महिमेति ते द्वे भूत्वोपावदतां ते न प्रति च न समवदत तास्ति
स्रो भूत्वोपावदंस्तत्तिसृभिः समभवत्तस्मादेकस्य बह्व्यो जाया भवंति नैकस्यै ब
ह्वः सह पतयो यद्वै तत्सा चामश्च समभवतां तत्सामाभवत्तत्साम्नः सामत्वं सामन्व
तियऽएवं वेद यो वै भवति यः श्रेष्ठतामश्नुते स सामन्नेवत्यसामन्यऽइति हि निंदंतिति वैपं
चान्यद्भूत्वा पंचान्यद्भूत्वाकल्पेतामाहावश्च हिंकारश्च प्रस्तावश्च प्रथमा च ऋगुद्गी
थश्च मध्यमा च प्रतिहारश्चोत्तमा च निधनं च वषट्कारश्च ते यत्पंचान्यद्भूत्वाकल्पे
तांतस्मा·स्मादाहुः पांक्तो यज्ञः पांक्ताः पशवऽइति यदु विराजं दशिनीमभिसमपद्ये
पंचान्यद्भूत्वा

ब्रा०त०
१५

तां तं समा इंद्रहु र्विराजिय षोडशिन्यां प्रतितिष्ठति तऽइत्यात्मा वै स्तोत्रियः प्रजानुरूपः प
त्नी धाय्या पशवः प्रगाथो गृहाः सूक्तं स वा अस्मिंश्च लोके मुष्मिंश्च प्रजया च
पशुभिश्च गृहेषु वसति य एवं वेद ॥ २३ ॥ स्तोत्रियं शंसत्यात्मा वै स्तोत्रियस्तं म
ध्यमया वाचा शंसत्यात्मानमेव तत्संस्कुरुते नुरूपं शंसति प्रजा वा अनुरूपः स
उच्चैस्तरामिवानुरूपः शंस्तव्यः प्रजामेव तच्छ्रेयसीमात्मनः कुरुते धाय्यां शंसति
पत्नी वै धाय्या सा नीचैस्तरामिव धाय्या शंस्तव्याप्रतिवादिनी हास्य गृहेषु पत्नी
भवति यत्रैवं विद्वान्नीचैस्तरां धाय्यां शंसति प्रगाथं शंसति सः स्वरवत्या वाचा
शंस्तव्यः पशवो वै स्वरः पशवः प्रगाथः पशूनामवरुध्या इंद्रस्य नु वीर्याणि प्रवो १५
चमिति सूक्तं शंसति तद्वा एतत्प्रियमिंद्रस्य सूक्तं निष्केवल्यं हैरण्यस्तूपमे
तेन वै सूक्तेन हिरण्यस्तूप आंगिरस इंद्रस्य प्रियं धामोपागच्छत्स परमं लो

कमजयदुपेंद्रस्य प्रियं धाम गच्छति जयति परमं लोकं य एवं वेद गृहा वै प्रतिष्ठा सूक्तं त
त्प्रतिष्ठिततमया वाचा शंस्तव्यं तस्माद्यद्यपि दूर इव पशूँल्लभते गृहानेवैनाना
जिगमिषति गृहा हि पशूनां प्रतिष्ठा प्रतिष्ठा ॥ २४ ॥ इति तृतीयपंचिकायां द्वितीयोध्यायः ॥
जा सोमो वै राजामुष्मिंल्लोक आसीत्तं देवाश्च ऋषयश्चाभ्यध्यायन्कथमयमस्मान्त्सो
मो राजागच्छेदिति तेऽब्रुवंश्छंदांसि यूयं न इमं सोमं राजानमाहरतेति तथेति ते सु
पर्णा भूत्वोदपतंस्ते यत्सुपर्णा भूत्वोदपतंस्तदेतत्सौपर्णमित्याख्यानविद आच
क्षते छंदांसि वै तत्सोमं राजानमच्छाचरंस्तानि ह तर्हि चतुरक्षराणि चतुरक्षराण्ये
व छंदांस्यासन्त्सा जगती चतुरक्षरा प्रथमोदपतत्सा पतित्वार्धमध्वनो गत्वा
श्राम्यत्सा परास्य त्रीण्यक्षराण्येकाक्षरा भूत्वा दीक्षां च तपश्च हरंती पुनरभ्यवा
पतत्तस्मात्तस्य वित्ता दीक्षा वित्तं तपो यस्य पशवः संति जागता हि पशवो जग

ऋा०त० तीहिंतानाहरदथत्रिष्टुबुदपतत्सापतित्वा भूयोर्द्धरध्वनोगत्वाप्राप्य त्वापरास्यैक
मक्षरं त्र्यक्षरा भूत्वा दक्षिणा आहरंती पुनरभ्यवापतत्तस्मान्माध्यंदिने दक्षिणानीयंते
१६ त्रिष्टुभो लोके त्रिष्टुप्क्षितादाहरत्॥२५॥ते देवा अब्रुवन्गायत्रीत्वमिदं सोमं
राजानमाहरेति सा तथेत्यब्रवीत्तां वै मा सर्वेण स्वस्त्ययनेनानुमंत्रयध्वमिति
तथेति सोदपतत्तां देवाः सर्वेण स्वस्त्ययनेनान्वमंत्रयंत प्रेति चेति चेत्येतद्वै सर्वं
स्वस्त्ययनं यत्प्रेति चेति चेति तद्योस्य प्रियस्यात्तमेतेनानुमंत्रयेत प्रेति चेति
चेति स्वस्त्येव गच्छति स्वस्ति पुनरागच्छति सा पतित्वा सोमपालान्भीषयित्वा पद्भ्यां
च मुखेन च सोमं राजानं समगृभ्णाद्यानि चेतरे छंदसी अक्षराण्यजहितां ता १६
नि चोपसमगृभ्णात्तस्या अनुविसृज्य कृशानुः सोमपालः सव्यस्य पदो न
खमच्छिदत्तच्छल्यकोऽभवत्तस्मात्स नखमिवैव यद्वशामस्वत्सा वशाभवत्तस्मा

त्साहविरिवाध्ययाशल्योयादनीकमासीत्स सर्पो निर्दंश्य नवत्स ह सस्वजो यानिप
र्णानि ते मंथावत्कायानि स्नावानि ते गंडूपदाय ते जनेसों धाहिः सा सा तथेपुरम
वत्॥२६॥सा यद्दक्षिणेन पदा समगृभ्णात्तस्मात्तः सवनमभवत्तद्गायत्रीस्वमा
यतनमकुरुत तस्मात्तत्समृद्धतमं मन्यंते सर्वेषां सवनानामग्रियो मुख्यो भ
वति श्रेष्ठतामश्नुते य एवं वेदाथ यत्सव्येन पदा समगृभ्णात्तन्माध्यंदिनं सव
प्रो नमभवत्तद्विस्रंसत तद्विस्रस्तं नान्वाप्त्पूर्वं सवनं ते देवाः प्राजिज्ञासंत तस्मिंस्त्रि
ष्टुभं छंदसामदधुरिंद्रं देवतानां तेन तत्समावद्वीर्यमभवत्पूर्वेण सवनेनोभाभ्यां
सवनाभ्यां समावद्वीर्याभ्यां समावज्जामीभ्यां राध्नोति य एवं वेदाथ यन्मुखेन
ती समगृभ्णात्तत्तृतीयसवनमभवत्तस्य पतंती रसमधयत्तद्धीतरसं नान्वाप्त्पूर्वे
सवने ते देवाः प्राजिज्ञासंत तत्पशुष्वपश्यंस्तदाशिरमवनयंस्तज्येन

ब्रा०न० पशुनाचरंतितेनतत्समावद्वीर्यममवत्पूर्वाभ्यांसवनाभ्यांसर्वैः सवनैःसमावद्वी
र्यैः समावज्जामिनीराध्नोतियऽएवंवेद ॥२७॥ तेवाऽइमेइतरेछंदसीगायत्री
मभ्यवदंतांवित्तंनावक्षराण्यनुपर्यागुरितिनेत्यब्रवीद्गायत्रीयथावित्तमेव
७ नऽइतितेदेवेषुप्रश्नमैतांतेदेवाऽअब्रुवन्यथावित्तमेववइतितस्माद्धाप्येत
र्हिवित्त्यांव्याहुर्यथावित्तमेवनइतिततोवाऽअष्टाक्षरागायत्र्यभवत्र्यक्षरात्रि
ष्टुबेकाक्षराजगतीसाष्टाक्षरागायत्रीप्रातःसवनमुदयछन्नाशक्नोत्त्रिष्टुप्
त्र्यक्षरामाध्यंदिनंसवनमुद्यंतुंतांगायत्र्यब्रवीदायान्यपिमेत्रास्त्वितिसा
तथेत्यब्रवीत्त्रिष्टुप्तांवैमेतैरष्टाभिरक्षरैरुपसंधेहीतितथेतितामुपसम ७
दधादेतद्धैतद्गायत्र्यैमध्यंदिनेयन्मरुत्वतीयस्योत्तरेप्रतिपदोयश्चानुच
रःसैकादशाक्षराभूत्वामाध्यंदिनंसवनमुदयछन्नाशक्नोज्जगत्येकाक्षरात्

तीयसवनमुद्यंतुंतांगायत्र्यब्रवीदायान्यपिमेत्रास्त्वितिसातथेत्यब्रवीज्जगती
तांवैमेतैरेकादशभिरक्षरैरुपसंधेहीतितथेतितामुपसमदधादेतद्धैतद्गायत्र्यै
तृतीयसवनेयद्वैश्वदेवस्योत्तरेप्रतिपदोयश्चानुचरःसाद्वादशाक्षराभूत्वात
तीयसवनमुदयछत्ततोवाऽअष्टाक्षरागायत्र्यभवदेकादशाक्षरात्रिष्टुप्
द्वादशाक्षराजगतीसर्वैःछंदोभिःसमावद्वीर्यैःसमावज्जामिभीराध्नोति
यऽएवंवेदैकंवैसत्तत्त्रेधाभवत्तस्मादाहुर्दातव्यमेवंविदुषऽइत्येकंहिस
त्तत्त्रेधाभवत् ॥२८॥ तेदेवाऽअब्रुवन्नादित्यान्युष्माभिरिदंसवनमुद्यछा
मेतितथेतितस्मादादित्यारंभणंतृतीयसवनमादित्यग्रहःपुरस्तात्तस्य
यजत्यादित्यासोऽअदितिर्मादयंतामितिमद्वत्यारूपसमृद्धयामद्व

श्री०ऐ० हैतत्तीयसवनस्यरूपंनानुवषट्करोतिनभक्षयतिसंस्थावाऽएषायदनुव ति
षट्कारःसंस्थाभक्षःप्राणाऽआदित्यानेप्राणान्संस्थापयानीतितऽआदि
१८ त्याऽअब्रुवन्त्सवितारंत्वयेदंसहसवनमुद्यच्छामेतितथेतितस्मात्सावि
त्रीप्रतिपद्भवतिवैश्वदेवस्यसावित्रग्रहःपुरस्तात्तस्ययजतिदमूनादेवः
सवितावरेण्यइतिमदद्वत्यारूपसमृद्धयामदद्वैतत्तीयसवनस्यरूपंनानु
वषट्करोतिनभक्षयतिसंस्थावाऽएषायदनुवषट्कारःसंस्थाभक्षःप्राणाः
सवितानेप्राणंसंस्थापयानीत्युभेवाऽएषएतेसवनेविपिबतियत्सविता १८
प्रातःसवनंचतृतीयसवनंचतस्माद्यत्पिबवत्सावित्र्यैनिविदःपदंपुरस्ताद्भ
वतिमदद्उपरिष्टादुभयोरेवैनंतत्सवनयोराभजतिप्रातःसवनेचतृ

तीयसवनेचबह्व्यःप्रातर्वायव्याःशस्यंतेऽएकातृतीयसवनेतस्मादूर्ध्वाःपुरुषस्य
भूयांसःप्राणायच्चावांचोद्यावापृथिवीयंशंसतिद्यावापृथिवीवैप्रतिष्ठेइयमेवे
हप्रतिष्ठासावमुत्रतद्यद्यावापृथिवीयंशंसतिप्रतिष्ठयोरेवैनंतत्प्रतिष्ठापय
ति॥२१॥आर्भवंशंसत्यृभवोवैदेवेषुतपसासोमपीथमभ्यजयंस्तेभ्यःप्रातः
सवनेवाचिकल्पयिषंस्तानग्निर्वसुभिःप्रातःसवनादनुदततेभ्योमाध्यंदिने
सवनेवाचिकल्पयिषंस्तानिंद्रोरुद्रैर्माध्यंदिनात्सवनादनुदततेभ्यःस्तृतीयस
वनेवाचिकल्पयिषंस्तान्विश्वेदेवाअनोनुद्यंतनेहपास्यंतिनेहेतिसप्रजापति
रब्रवीत्सवितारंतववाऽइमेंतेवासास्त्वमेवेभिःसंपिबस्वेतिसतथेत्यब्रवी
त्सविताताऽन्वैत्वमुभयतःपरिपिबेतितान्प्रजापतिरुभयतःपर्यपिबन्नेए

श्री•तू•
१९

ते धाय्ये ऽअनिरुक्ते प्राजापत्ये शस्येते ऽअभित ऽआर्भवं सुरूपकृत्नुमूतये यं वेनश्चो
दयत्पृश्निगर्भा इति प्रजापतिर्वै नांस्तदुभयतः परिपिबति तस्माद्‌ उः श्रेष्ठीपा
त्रे रोचयत्येवेयं कामयते तं तेभ्यो वै देवा ऽअपेवाबीभत्संतं मनुष्यगंधास्त ऽ
एते धाय्ये ऽअंतरदधुर्त ये भ्योमा ते वा पित्र इति ॥२०॥ वैश्वदेवं शंसति यथा
वै प्रजा ऽएवं वैश्वदेवं तद्यथांतरं जनता एवं सूक्तानि यथारण्यान्येवं धाय्या
स्तदुभयतो धाय्यां पर्याद्धयति तस्मात्तान्यरण्यानि संत्यनरण्यानि मृगैश्च
वयोभिश्चेति ह स्माह यथा वै पुरुष एवं वैश्वदेवं तस्य यथावांतरमंगान्येवं १९
सूक्तानि यथापर्वाण्येवं धाय्यास्तदुभयतो धाय्यां पर्याद्धयति तस्मात्पुरुष
स्य पर्वाणि शिथिराणि संति दृढानि ब्रह्मणा हितानि ध्रुतानि मूलं वा ऽ

एतद्यत्सूक्तस्य याज्या ऽन्नया ज्या ऽन्नंत घद न्या ऽअन्या धाय्या ऽन्नया ज्या ऽन्नं कुर्युरुन्मूलमेव तद्य
ज्ञं कुर्युस्तस्मात्ताः समान्यः एव स्युः पांचजन्यं वा एतदुक्थं यद्वैश्वदेवं सर्वेषां वा एत
त्पंचजनानामुक्थं देवमनुष्याणां गंधर्वाप्सरसां सर्पाणां च पितृणां चैतेषां वा ऽए
तत्पंचजनानामुक्थं सर्व ऽएनं पंचजना विदुरैनं पंचिन्यै जनतायै हविनो गच्छंति
य ऽएवं वेद सर्वदेवत्यो वा ऽएष होता यो वैश्वदेवं शंसति सर्वा दिशो ध्यायेच्छंशिष्य
न्सर्वास्वेव तद्दिक्षुरसं दधाति यस्यामस्य दिशि द्वेष्यः स्यान्न तां ध्यायेदनु हास्यैव
स्य तद्वीर्यमादत्ते दितिर्द्यौरदितिरंतरिक्षमित्युत्तमया परिदधातीयं वा ऽअदिति
रियं द्यौरियमंतरिक्षमदितिर्माता स पिता स पुत्र इतीयं वै माता यं पिता यं पुत्रो वि
श्वे देवा ऽअदितिः पंचजना इत्यस्यां वै विश्वे देवा ऽअस्यां पंचजना ऽअदितिर्जात
मदितिर्जनित्वमितीयं वै जातमियं जनित्वं द्विः पच्छः परिदधाति चतुष्पदा

श्रा०त० वैपशवःपशूनामवरुध्यैसरुदर्धर्चशःप्रतिष्ठायायैवद्विप्रतिष्ठोवैपुरुषश्चतुष्पादःपशवो
यजमानमेवतद्विप्रतिष्ठंचतुष्पात्सुपशुषुप्रतिष्ठापयतिसदेवपंचजनीययाप
२० रिदध्यात्तदुपस्पृशन्भूमिंपरिदध्यात्तद्यस्यामेवयज्ञंसंभरतितस्यामेवैनंतदंततःप्र
तिष्ठापयतिविश्वेदेवाःशृणुतेमंहवंमइतिवैश्वदेवमुक्थशस्त्वावैश्वदेव्यायज
तियथाभागंतद्देवताःप्रीणाति॥२१॥आग्नेयीप्रथमाघृतयाज्यासौमीसौम्य
याज्यावैष्णवीघृतयाज्यात्वंसोमपितृभिःसंविदानइतिसौम्यस्यपितृमत्सा
पजतिघ्नंतिवाएतत्सोमंयदभिषुण्वंतितस्यैतामनुस्तरणींकुर्वंतियत्सौम्यः २०
पितृभ्योवाऽअनुस्तरणीतस्मात्सौम्यस्यपितृमत्यायजत्यवधिषुर्वाऽएतत्सो
मंयदस्यसुषवुःस्तदेनंपुनःसंभावयंतिपुनराप्याययंत्युपसदांरूपेणोप

सदांकिल्वैतद्रूपंयदेतादेवताऽअग्निःसोमोविष्णुरितिप्रतिगृह्यसौम्यंहोतापूर्वश्छंदोगे
भ्योविक्षेततंहैकेपूर्वंछंदोगेभ्योहरंतितत्तथानकुर्याद्वषट्कर्त्ताप्रथमःसर्वभक्षा
न्भक्षयतीतिहस्माहतेनैवरूपेणतस्माद्वषट्कर्त्तैवपूर्वोवेक्षेताथैनंछंदोगेभ्यो
न्य हरंति॥२२॥प्रजापतिर्वैस्वांदुहितरमभ्यध्यायद्दिवमित्यन्यऽआहुरुषसमित्यन्येता
मृश्योभूत्वारोहितंभूतामभ्यैत्तंदेवाऽअपश्यन्नकृतंवैप्रजापतिःकरोतीतितेतमै
च्छन्यऽएनमारिष्यत्यतमन्योन्यस्मिन्नाविंदंस्तेषांयाऽएवघोरतमास्तन्वऽआ
संस्ताऽएकधासमभरंस्ताःसंभृताएषदेवोऽभवत्तदस्यैतद्भूतवन्नामभवतिवैस तत्
योस्यैतदेवंनामवेदतंदेवाऽअब्रुवन्नयंवैप्रजापतिरकृतमकरिमंविध्येतिसत
थेत्यब्रवीत्सवैवोवरंवृणाऽइतिवृणीष्वेतिसऽएतमेववरमवृणीतपशूनामा
धिपत्यंतदस्यैतत्पशुमन्नामपशुमान्भवतियोस्यैतदेवंनामवेदतमभ्याय

ब्रा०ऐ० स्याविध्यत्स विद्ध ऊर्ध्व उदप्रपतत्तमेतं मृग इत्याचक्षते य उ एव मृगव्याधः स उ ए
व स या रोहित्सा रोहिणी यो एवेषुस्त्रिकाण्डा सो एवेषुस्त्रिकाण्डा तद्वा इदं प्रजापते
२१ रेतः सिक्तमधावत्तत्सरो ऽभवत्ते देवा अब्रुवन्मेदं प्रजापते रेतो दुषदिति यदब्रु
वन्मेदं प्रजापते रेतो दुषदिति तन्मादुषमभवत्तन्मादुषस्य मादुषत्वं मादुषं
ह वै नामैतद्यन्मानुषं तन्मादुषं सन्मानुषमित्याचक्षते परोक्षेण परोक्षप्रिया ऽ
इव हि देवाः ॥३३॥ तदग्निना पर्यादधुस्तन्मरुतो ऽधून्वंस्तदग्निर्न प्राच्यावय
त्तदग्निना वैश्वानरेण पर्यादधुस्तन्मरुतो ऽधून्वंस्तदग्निर्वैश्वानरः प्राच्याव
यत्तस्य यद्रेतसः प्रथममुददीप्यत तदसावादित्यो ऽभवद्यद्द्वितीयमासीत्त २१
द्भृगुरभवत्तं वरुणो न्यगृह्णीत तस्मात्स भृगुर्वारुणिरथ यत्तृतीयमदीदे
दिव त आदित्या अभवन्ये ऽङ्गारा आसंस्ते ऽङ्गिरसो ऽभवन्यदङ्गाराः पुनरव

शान्ता उददीप्यन्त तद्बृहस्पतिरभवद्यानि परिक्षाणान्यासंस्ते कृष्णाः पशवो ऽभवन्या लो
हिनी मृत्तिका ते रोहिता अथ यद्भस्मासीत्तत्परुष्यं व्यसर्पद्गौरो गवय ऋश्य उष्ट्रोग
र्दभ इति ये चैते ऽरुणाः पशवस्ते च तान्वा एषो ऽभ्यवदत मम वा इदं मम वै वास्तुह
मिति तमेतयर्चा निरवादयत यैषा रौद्री शस्यत आ ते पितर्मरुतां सुम्नमेतु मा
नः सूर्यस्य संदृशो युयोथा ॥ त्वं नो वीरो अर्वति क्षमेथा इति ब्रूयान्नाभिन इत्य
नभिमानुको हैष देवः प्रजा भवत्यभिप्र जायेमहि रुद्रिय प्रजाभिरिति ब्रूयान्न
रुद्र इत्येतस्यैव नाम्नः परिहृत्यै तदु खलु शं नः करतीत्येव शंसेच्छमिति प्रति
पद्यते सर्वस्मा एव शान्त्यै नृभ्यो नारिभ्यो गव इति पुमांसो वै नरः स्त्रियो ना
र्यः सर्वस्मा एव शान्त्यै सो निरुक्ता रौद्री शान्ता सर्वायुः सर्वायुत्वाय सर्वमायु
रेति य एवं वेद सो गायत्री ब्रह्म वै गायत्री ब्रह्मणैवैनं तं नमस्यति ॥ ३४ ॥

श्री०त० वैश्वानरीयेणाग्निमारुतंप्रतिपद्यतेवैश्वानरोवाऽएतद्रेतःसिक्तंप्राच्यावयत्तस्माद्वैश्वा
नरीयेणाग्निमारुतंप्रतिपद्यतेनवानंप्रथमऋचःकूर्शस्तव्याग्नीन्वाऽएषोर्द्वेष्य
२२ शांतान्प्रसीदंनेतियऽआग्निमारुतंशंसतिप्राणेनैवतदग्नीस्तरत्यधीयंनुपर
न्यादग्व्यविविचारमिष्टेनमेवतत्सेतुंकृत्वातरतितस्मादाग्निमारुतेनैच्छमेष्टव्यो मु
विवक्तामारुतंशंसतिमरुतोहवाऽएतद्रेतःसिक्तंधून्वंतःप्राच्यावयंस्तस्मा
न्मारुतंशंसतियज्ञायज्ञावोऽअग्नयेदेवोवोद्रविणोदाइतिमध्येयोनि
चानुरूपंचशंसतितद्यन्मध्येयोनिंचानुरूपंचशंसतितस्मान्मध्ये
योनिर्धृतोयद्धद्देस्तन्केशस्त्वाशंसतिप्रतिष्ठयोरेवतदुपरिष्टात्प्रजननंद
दधातिप्रजात्यैप्रजायतेप्रजयापशुभिर्यऽएवंवेद॥३५॥जातवेदस्यं
शंसतिप्रजापतिःप्रजाऽअसृजततताःसृष्टाःपराच्यऽएवासंनव्यावर्तंत २२

ताऽअग्निनापर्यगच्छत्ताऽअग्निमुपावर्ततंतमेवाद्याप्युपावृत्ताःसोब्रवीज्जातावैप्रजाऽ
अनेनाविदमितियदब्रवीज्जातावैप्रजाऽअनेनाविदमितितज्जातवेदस्यमभवत्त
ज्जातवेदसोजातवेदस्त्वंताऽअग्निनापरिगतानिरुद्धाःशोचत्योदीध्यत्योतिष्ठं
स्ताऽअद्भिरभ्यषिंचत्तस्मादुपरिष्टाज्जातवेदस्यस्यापोहिष्ठीयंशंसतितस्मात्त
छमयतेवशांस्तव्यंताऽअद्भिरभिषिच्यनिजास्येवामन्यततासुवाऽअहिनाबु
ध्न्येनपरोक्षात्तेजोदधादेषहवाऽअहिर्बुध्न्योयदग्निर्गार्हपत्योग्निनेवासुत
गार्हपत्येनपरोक्षात्तेजोदधातितस्मादाजुह्वदेवाजुह्वतोवसीयानिति॥३६॥ ॐ
देवानांपत्नीःशंसत्यनूचीरग्निंगृहपतिंतस्मादनूचीपत्नीगार्हपत्यमास्तेतत
दाहूराकांपूर्वांशंसेज्जाम्यैवैपूर्वपेयमितितत्तंनादृत्यदेवानामेवपत्नीःपूर्वाः
शंसेदेषहवाऽएतत्पत्नीषुरेतोदधातियदग्निर्गार्हपत्योग्निनैवासुतगार्हप

श्रा०न० त्येनपत्नीषुप्रत्यक्षाद्रेतोदधातिप्रजात्येप्रजायतेप्रजयापशुभिर्यऽएवंवेदतस्मा
२२ त्समानोदर्याःस्वसान्योदर्यायैजायायाऽअनुजीविनीजीवतिराकांशंसतिराका
हवाऽएतांपुरुषस्यसेवनींसीव्यतियेषाशिश्नेऽधिपुमांसोस्यपुत्राजायंते
यऽएवंवेदपावीरवींशंसतिवाग्वैसरस्वतीपावीरवीवाच्येवतद्वाचंदधातित
दाहुर्यामीपूर्वांशंसे३त्।।पित्र्यां३इति।।याम्यामेवपूर्वांशंसेदिमंयममस्त
रमाहिसीदेतिराज्ञोवैपूर्वपेयंतस्माद्याम्यामेवपूर्वांशंसेन्मातलीकव्यैर्य
मोऽअंगिरोभिरितिकाव्यानामनूचींशंसत्यवरेणैववैदेवान्काव्याःपरे
णैवपितृंस्तस्मात्काव्यानामनूचींशंसत्युदीरतामवरऽउत्परासऽइति २२
पित्र्याःशंसत्युन्मध्यमाःपितरःसोम्यासइतियेचैवावमायेचपरमायेच
मध्यमास्तांत्सर्वाननंतरायंप्रीणात्याहंपितृंत्सुविदत्रांऽअवित्सीतिद्विती

यांशंसतिबर्हिषदोयेस्वधयासुतस्येत्येतद्वाऽएषांप्रियंधामयद्बर्हिषदइतिप्रि
येणैवैनंतद्धाम्नासमर्द्धयतिप्रियेणधाम्नासमृध्यतेयऽएवंवेदपितृभ्यो
नमोऽअस्त्वद्येतिनमस्कारवतींमततःशंसतितस्मादंततःपितृभ्योनमस्क्रियं
तेतदाहुर्व्याहावंपित्र्याःशंसे३त्।।अव्याहावा३इति।।व्याहावमेवशंसेदसं
स्थितंवैपितृयज्ञस्यसाध्वसंस्थितंवाऽएषपितृयज्ञंसंस्थापयतियोव्याहा
वंशंसतितस्माद्व्याहावमेवशंस्तव्यं।।२०।।स्वादुष्किलायंमधुमांऽउतायं
मितीद्रस्यैंद्रीरनुपानीयाःशंसत्येताभिर्वाइंद्रस्तृतीयसवनमन्वपिबत्तदनु
पानीयानामनुपानीयात्वंमाद्यंतीवैवैताहिदेवतायदेतादेवताहोताशंसति
तस्मादेतासुमद्वत्स्वतिगायैययोरोजसास्कभितारजांसीतिवैष्णुवारुणी
मृचंशंसतिविष्णुर्वैयज्ञस्यदुरिष्टंपातिवरुणस्विष्टंतयोरुभयोरेवशांत्यै

विष्णोर्नुकंवीर्याणिप्रवोचमितिवैष्णवींशंसतियथावैमत्यमेवंयज्ञस्यविष्णुस्त
श्री.ऐ. द्यथादुष्कृष्टंदुर्मतीकृतंसुकृष्टंसुमतीकृतंकुर्वंत्येवमेवैतद्यज्ञस्यदुष्टंतदुः
२४ शस्तंसुष्टुतंसुशस्तंकुर्वन्तीतियदेताहोताशंसतितंतुंतन्वन्रजसोभानुमन्वि
हीतिप्राजापत्यांशंसतिप्रजावैतंतुःप्रजामेवास्माऽएतत्संतनोतिज्योतिष्मतःपथो
रक्षधियाकृतानितिदेवयानावैज्योतिष्मंतःपंथानस्तानेवास्माऽएतद्वितनोत्यनु
ल्बणंवयतजोगुवामपोमनुर्भवजनयादैव्यंजनमित्यैवैनंतन्मानोःप्रजयास
न्तनोतिप्रजात्यैप्रजायतेप्रजयापशुभिर्यऽएवंवेदवानऽइंद्रोमघवाविरप्शीसुच
मयापरिदध्यातीयंवाऽइंद्रोमघवाविरप्शीकरत्सत्याचर्षणीधृदनर्वेतीयंवैस २४
त्याचर्षणीधृदनर्वा॥त्वंराजाजनुषांधेह्यस्मेइतीयंवैराजाजनुषामधिश्र
वोमाहिनंयज्जरित्रइतीयंवैमाहिनंपयज्ञश्चवोयजमानोजरितायजमाना

यैवैतामाशिषमाशास्तेतदुपस्पृशन्भूमिंपरिदध्यात्तद्यस्यामेवयज्ञंसंभरतितस्यामेवैनं
तदंततःप्रतिष्ठापयत्यग्नेमरुद्भिःशुभयद्भिर्ऋक्वभिरित्याग्निमारुतमुक्थंशस्त्वा
ग्निमारुत्याययजतियथाभागंतद्देवताःप्रीणातिप्रीणाति॥२८॥तृतीयपंचिकायां
तृतीयोध्यायः॥देवावाऽअसुरैर्युद्धमुपप्रायन्विजयायतानग्निर्नान्वकामयतै
तुंतंदेवाऽअब्रुवन्नपित्वमेह्यस्माकंवैत्वमेकोसीतिसनास्तुतोन्वेष्यामीत्यब्र
वीत्स्तुतनुमेतितथेतितंतेसमुत्क्रम्योपनिवृत्यास्तुवंस्तान्स्तुतोनुप्रैत्सत्रिः
श्रेणिर्भूत्वात्र्यनीकोसुरान्युद्धमुपप्रायद्विजयायत्रिःश्रेणिरितिछंदांस्ये
वश्रेणीरकुरुतत्र्यनीकइतिसवनान्येवानीकानितानसंभाव्यंपराभावयत्त
तोवैदेवाऽअभवन्पराऽसुराभवत्यात्मनापरास्यद्विषन्पाप्माभ्रातृव्योभवति
यऽएवंवेदसावाऽएषागायत्र्येवयदग्निष्टोमश्चतुर्विंशत्यक्षरावैगायत्रीचतु

ऐ०ब्रा० विंशतिरग्निष्टोमस्यस्तुतशस्त्राणितद्वैयदिदमाहुःसुधायांहवैवाजीसुहितोदधा
२५ तीतिगायत्रीवैतंनहवैगायत्रीक्षमारमतऽऊर्ध्वाहवाएषायजमानमादायस्वरे
तीत्यग्निष्टोमोवैतंनहवाऽअग्निष्टोमःक्षमारमतऽऊर्ध्वोहवाएषयजमानमा
दायस्वरेतिसवाऽएषसंवत्सरऽएवयदग्निष्टोमश्चतुर्विंशास्र्द्धमासोवैसंव
त्सरश्चतुर्विंशतिरग्निष्टोमस्यस्तुतशस्त्राणितंयथासमुद्रंस्रोत्याऽएवं
सर्वेयज्ञक्रतवोपियंति॥२९॥दीक्षणीयेष्टिस्तायतेतामेवानुयाःकाश्चेष्ट
यस्ताःसर्वाऽअग्निष्टोममपियंतीळामुपह्वयतऽइळाविधावैपाकयज्ञा २५
इळामेवानुयेकेचपाकयज्ञास्तेसर्वेग्निष्टोममपियंतिसायंप्रातरग्निहो
त्रंजुह्वतिसायंप्रातर्व्रतंप्रयच्छंतिस्वाहाकारेणाग्निहोत्रंजुह्वतिस्वाहाका

रेणव्रतंप्रयच्छंतिस्वाहाकारमेवान्वग्निहोत्रमग्निष्टोममप्येतिपंचदशप्रा
यणीयेसामिधेनीरन्वाहपंचदशदर्शपूर्णमासयोःप्रायणीयमेवानुदर्शपूर्ण
मासावग्निष्टोममपीतःसोमंवैराजानंक्रीणंत्योषधोवैसोमोराजौषधि
भिस्तंभिषज्यंतियंभिषज्यंतिसोममेवराजानंक्रीयमाणमनुयानिका
निचभेषजानितानिसर्वाण्यग्निष्टोममपियंत्यग्निमातिथ्येमंथंत्यग्निं
चातुर्मास्येष्वातिथ्यमेवानुचातुर्मास्यान्यग्निष्टोममपियंतिपयसाप्र
वर्ग्यंचरंतिपयसादाक्षायणयज्ञेप्रवर्ग्यमेवानुदाक्षायणयज्ञोग्निष्टो
ममप्येतिपशुरुपवसथेभवतितमेवानुयेकेचपशुबंधास्तेसर्वेग्निष्टो
ममपियंतीळादधोनामयज्ञक्रतुस्तंदध्नाचरंतिदध्नादधिघर्मेदधिघ

र्ममेवान्विद्धोग्निष्टोममप्येति॥४०॥इतिनुपुरस्तादथोपरिष्टात्पंचदशोक्थ्यस्य
ब्रा०तृ० स्तोत्राणिपंचदशशस्त्राणिसमासोमासधासंवत्सरोविहितःसंवत्सरोग्निर्वैश्वा
२६ नरोग्निरग्निष्टोमःसंवत्सरंन्वक्थ्योग्निष्टोममप्येत्युक्थ्यमपियंतमनुवाजपे मेवा
योप्येत्युक्थ्योहिसभवतिद्वादशरात्रेःपर्यायाःसर्वेपंचदशास्तेद्वौसंपद्य द्वौ
त्रिंशदेकविंशषोळशिसामत्रिवत्संधिःसात्रिंशत्सामासस्त्रिंशन्मासस्य
रात्रयोमासदीसंवत्सरोविहितःसंवत्सरोग्निर्वैश्वानरोग्निरग्निष्टोमः
संवत्सरमेवान्वतिरात्रोग्निष्टोममप्येत्यतिरात्रमपियंतमन्वप्तोर्यामो
प्येत्यप्त्यतिरात्रोहिसभवत्येतद्वैयेचपुरस्ताद्येचोपरिष्टाद्यज्ञक्रतवस्तेस २८
र्वेग्निष्टोममपियंतितस्यसंस्तुतस्यनवतिशतंस्तोत्रियाःसायानवतिस्तद्

शत्रिवृतोथयानवतिस्तदशाथयादशतासामेकास्तोत्रियादेतित्रिवृत्तसशिष्यते
सोसावेकविंशोध्याहितस्तपतिविषुवान्वाएषस्तोमानांदशवाऽएतस्माद्वीच
स्त्रिवृतोदशपरांचोमध्यऽएषऽएकविंशऽउभयतोध्याहितस्तपतितद्यासौस्तो
त्रियादतिसेतस्मिन्नध्यूढासयजमानस्तद्वैवंसत्रेसहोबलमश्नुतेहवैदै
वंसत्रेसहोबलमेतस्यहसायुज्यंसरूपतांसलोकतामश्नुतेयऽएवंवेद॥
॥४१॥देवावाऽअसुरैर्विजिग्यानाऊर्ध्वाःस्वर्गंलोकमायंस्तोग्निर्दिविस्पृगू
र्ध्वउदश्रयतसस्वर्गस्यलोकस्यद्वारमवृणोदग्निर्वैस्वर्गस्यलोकस्या
धिपतिस्तंवसवःप्रथमाऽआगछंस्तऽएनमब्रुवन्नतिनोर्जस्याकाशंनःकु
र्वितिसनास्तुतोतिस्रक्ष्यइत्यब्रवीत्स्तुतनुमेतितथेतितेत्रिवृतास्तोमेनास्तु

ब्रा० ८० वंस्तान्स्तुतोत्या र्जतते यथालोकमगच्छंस्तंरुद्राऽआगच्छंस्तऽएनमब्रुवन्नतिनो
र्जस्याकाशन्नः कुर्विति स नास्तुतोति सस्यऽइत्यब्रवीत्स्तुत नु मेति तथेति तंतेप
२७ चदशेन स्तोमेनास्तुवंस्तान्स्तुतोत्या र्जततेयथाऽलोकमगच्छंस्तमादित्याऽआ
गच्छंस्तऽएनमब्रुवन्नतिनो र्जः स्याकाशंनः कुर्विति स नास्तुतोति सस्यऽइत्य
ब्रवीत्स्तुतनुमेति तथेति तंते सप्तदशेन स्तोमेनास्तुवंस्तान्स्तुतोत्या र्जतते
यथा लोकमगच्छंस्तं विश्वेदेवाऽआगच्छंस्तऽएनमब्रुवन्नति नो र्जस्याकाशं व
नः कुर्विति स नास्तुतोति सस्यऽइत्यब्रवीत्स्तुत नु मेति तथेति तंतऽएकविं २७
शेन स्तोमेनास्तुवंस्तान्स्तुतोत्या र्जतते यथालोकमगच्छन्नेकैकेनवै
तं देवा स्तोमेनास्तुवंस्तान्स्तुतोत्या र्जततेयथालोकमगच्छन्नथहैनमेषऽ

एतैः सर्वैः स्तोमैः स्तौतियो यजते यश्चैनमेवं वेदाती तु तम र्जोता अति ह वाऽएनमर्जं
ते स्वर्गो लोकमभियऽएवं वेद॥ ४२॥ स वाऽएषोग्निरेव यदग्निष्टोमस्तं यदस्तुवं
स्तस्मादग्निस्तोमस्तमग्निस्तोमं सन्तमग्निष्टोममित्याचक्षते परोक्षेणपरो
क्षप्रिया इव हि देवा स्तं यच्चतुष्टया देवाश्चतुर्भि स्तोमैरस्तुवं स्तस्माच्चतु स्तोम
स्तं चतुस्तोमं सन्तं चतुष्टोम इत्याचक्षते परोक्षेणपरोक्षप्रिया इव हि देवाऽअथ
यदेनमूर्ध्वं सन्तं ज्योतिर्भूतमस्तुवं स्तस्माऽज्योति स्तोमस्तं ज्योति स्तोमं सं
तं ज्योतिष्टोम इत्याचक्षते परोक्षेणपरोक्षप्रिया इव हि देवाः स वाऽएषोपूर्वो
नपरो यज्ञक्रतुर्यथा रथचक्रमनन्तमेवं यदग्निष्टोमस्तस्य यथैव प्रायणं तथो
दयनं तदेषाभियज्ञगाथा गीयते॥ यदस्य पूर्वमपरं तदस्य यदस्यापरं तद
स्यपूर्वं॥ अहेरिव सर्पणं शाकलस्य न विजानन्ति यतरत्परस्तादिति यथो

ब्रा॰ तृ॰ खेवास्यप्रायणमेवमुदयनमसदितितदाहुर्यंत्रिवृत्प्रायणमेकविंशमुदयनंके
नतेसमेइतियोवाऽएकविंशस्त्रिवृद्धैसोयोयदुभौतचौतचिनावितिब्रूयात्ते
२८ नेति॥४३॥योवाएषतपत्येषोग्निष्टोमएषसाह्नस्तंसहैवाह्नासंस्थापयेयुःसा
ह्नोवैनामतेनासंत्वरमाणाश्चरेयुर्यथैवप्रातःसवनऽएवंमाध्यंदिनेऽएवंतृ
तीयसवनएवमुहयजमानोऽप्रमायुकोभवतियद्धवाइदंपूर्वयोःसवनयोरसं
त्वरमाणाश्चरंतितस्मादिदंप्राच्योग्रामताबहुलाविष्टाऽअथयदिदंतृती
यसवनेसंत्वरमाणाश्चरंतितस्मादिदंप्रत्यंचिदीर्घारण्यानिभवंतितथाह
यजमानःप्रमायुकोभवतितेनासंत्वरमाणाश्चरेयुर्यथैवप्रातःसवनऽएवं २८
माध्यंदिनेऽएवंतृतीयसवनएवमुहयजमानोऽप्रमायुकोभवतिसऽएत

मेवशस्त्रेणानुपर्यावर्ततेयदावाऽएषप्रातरुदेत्यथमंद्रंतपतितस्मान्मंद्रयावाचाप्रातः
सवनेशंसेदथयदाभ्येत्यथबलीयस्तपतितस्माद्बलीयस्यावाचामध्यंदिनेशं
सेदथयदाभितरामेत्यथबलिष्ठतमंतपतितस्माद्बलिष्ठतमयावाचातृतीय
सवनेशंसेदेवंशंसेद्यदिवाचईशीतवाच्छिशस्त्रंययातुवाचोत्तरोत्तरिण्योत्स
हेतसमापनायतयाप्रतिपद्येतैतत्सुशस्ततममिवभवतिसवाऽएषनकदा
चनास्तमेतिनोदेतितंयदस्तमेतीतिमन्यंतेऽह्नएवतदंतमित्वाथात्मानंवि
पर्यस्यतेरात्रीमेवावस्तात्कुरुतेऽहःपरस्तादथयदेनंप्रातरुदेतीतिमन्यंतेरा
त्रेरेवतदंतमित्वाथात्मानंविपर्यस्यतेऽहरेवावस्तात्कुरुतेरात्रींपरस्तात्सवा
एषनकदाचननिम्रोचतिनहवैकदाचननिम्रोचत्यैतस्यहसायुज्यंसरू

मन्त्र

ऋ०तृ० पतांसलोकतामश्नुतेयऽएवंवेदयऽएवंवेद॥५॥इतितृतीयपंचिकायांचतुर्थो॥वे
यज्ञोवैदेवेभ्योन्नाद्यमुदक्रामत्तेदेवाऽअब्रुवन्यज्ञोवैनोन्नाद्यमुदक्रमीदन्विमंय
२९ ज्ञमन्विच्छामेतितेब्रुवन्कथमन्विच्छामेतिब्राह्मणेनचछंदोभिश्चेत्यब्रुवंस्ते
ब्राह्मणंछंदोभिरदीक्षयंस्तस्यांतंयज्ञमतन्वतापिपत्नीःसमयाजयंस्तस्मा
द्धाप्येतर्हिदीक्षणीयायामिष्टावांतमेवयज्ञंतन्वतेपिपत्नीःसंयाजयंतित
मनुन्यायमन्ववायंस्तेप्रायणीयमतन्वततंप्रायणीयेननेदीयोन्वागछंस्ते
कर्मभिःसमत्वरंततकंव्यंतमकुर्वंस्तस्माद्धाप्येतर्हिप्रायणीयंशंय्वंत
मेवभवतितमनुन्यायमन्ववायंस्तऽआतिथ्यमतन्वततमातिथ्येननेदी २९
योन्वागछंस्तेकर्मभिःसमत्वरंततदिळांतमकुर्वंस्तस्माद्धाप्येतर्ह्यातिथ्य

मिळांतमेवभवतितमनुन्यायमन्ववायंस्तऽउपसदोतन्वततमुपसद्भिर्नेदीयोन्वा
गछंस्तेकर्मभिःसमत्वरंततेतिस्रःसामिधेनीरनूच्यतिस्रोदेवताऽअयजंस्त
स्माद्धाप्येतर्ह्युपसत्सुतिस्रऽएवसामिधेनीरनूच्यतिस्रोदेवतायजंतितम
नुन्यायमन्ववायंस्तऽउपवसथमतन्वततमुपवसथ्येह्न्याप्नुवंस्तमाप्तां
तंयज्ञमतन्वतापिपत्नीःसमयाजयंस्तस्माद्धाप्येतर्ह्युपवसथऽआंतमे
वयज्ञंतन्वतेपिपत्नीःसंयाजयंतितस्मादेतेषुपूर्वेषुकर्मसुशनैस्तरांशनै
स्तरामिवानुब्रूयादन्वाहस्थानमिवहितेतमायंस्तस्मादुपवसथेयावत्यावाचा
कामयीततावत्यानुब्रूयादाप्तोहिसतर्हिभवतीतितमाप्त्वाब्रुवंस्तिष्ठस्वनो
न्नाद्यायेतिसनेत्यब्रवीत्कथंवस्तिष्ठेयेतितानीक्षतैवतमब्रुवन्ब्राह्मणेन

श्री०त० चनश्छंदोभिश्चसयुग्भूत्वांनाद्यायतिष्ठस्वेतितथेतितस्माद्वाप्येतर्हियत्तः
सयुग्भूत्वादेवेभ्योहव्यंवहतिब्राह्मणेनचच्छंदोभिश्च॥४५॥त्रीणिहवैय
३० ज्ञेक्रियंतेजग्धंगीर्णंवांतंतदेवजग्धंयदाशंसमानमार्त्विज्यंकारयते
उतवामेदद्यादुतवामाकृणीतेतितद्धतत्पराङेवयथाजग्धंनहैवतद्यज
मानंभुनक्त्यथहैतदेवगीर्णंयद्बिभ्यदार्त्विज्यंकारयतउतवामानबाधे
तोतवामेनयज्ञवेशसंकुर्यादितितद्धतत्पराङेवयथागीर्णंनहैवतद्यज
मानंभुनक्त्यथहैतदेववांतंयदभिशस्यमानमार्त्विज्यंकारयतेयथा
हवाइदंवांतान्मनुष्याबीभत्संतएवंतस्माद्देवास्तद्धतत्पराङेवयथावां ३०
तंनहैवतद्यजमानंभुनक्तिसएतेषांत्रयाणामाशान्नेयात्तंयद्येतेषां

त्रयाणामेकंचिदकामस्यात्भवेत्तस्यास्तिवामदेव्यस्यस्तोत्रेप्रायश्चित्तिरिदंवाइदंवाम
देव्यंयजमानलोकोमृतलोकःस्वर्गोलोकस्तत्त्रिभिरक्षरैर्न्यूनंतस्यस्तोत्रउप
सृप्यत्रेधात्मानंविगृह्णीयात्पुरुषइतिसएतेषुलोकेष्वात्मानंदधात्यस्मिन्य
जमानलोकेस्मिन्नमृतलोकेस्मिन्स्वर्गेलोकेससर्वांदुरिष्टिमत्येत्यपिय
दिसमृद्धाइवर्त्विजःस्युरितिहस्माहाथहैतज्जपेदेवेति॥४६॥छंदांसिवै
देवेभ्योहव्यमूढ्वाश्रांतानिजघनार्धेयज्ञस्यतिष्ठंतियथाश्वोवाश्वतरोवोहि
वांस्तिष्ठेदेवंतेभ्यएतंमैत्रावरुणंपशुंपुरोळाशमनुदेविकाहवींषिनिर्वपेद्धा
त्रेपुरोळाशंद्वादशकपालंयोधातासवषट्कारोनुमत्यैचरुंयानुमतिःसा
गायत्रीराकायैचरुंयाराकासात्रिष्टुप्सिनीवाल्यैचरुंयासिनीवालीसा

श्रा०त० जगतीकुह्वै चरुंयाकुहूः सानुष्टुब्वेतानिवाव सर्वाणिछंदांसिगायत्रंत्रैष्टुभंजाग
तमानुष्टुभमन्वंन्याम्येतानिह्यियज्ञेप्रतमामिवक्रियंतेऽएते ह वाऽअस्यछंदोभि
र्यजतः सर्वैश्छंदोभिरिष्टं भवतियऽएवंवेदतद्वैयदिदमाहुः सुधायांहवैवाजी
३१ सुहितोदधातीतिछंदांसिवैतत्सुधायांहवाऽएनंछंदांसिदधत्यननुध्यायि
नंलोकंजयतियऽएवंवेदतद्वैकऽआहुर्धातारमेवसर्वासांपुरस्तात्पुरस्ता
दाज्येनपरियजेत्तदासुसर्वासु मिथुनंदधातीतितदु वाऽआहुर्जामिवाऽ
एतद्यज्ञेक्रियतेयत्र समानीभ्यामृग्भ्यां समानेहन्यजतीतियदिहवाऽअ
पिबह्व्यइवजायाः पतिर्वावतासांमिथुनंतद्यदासांधातारंपुरस्ताद्यजति ३१
तदासुसर्वासुमिथुनंदधातीतिनुदेविकानां॥ ५ ॥अथदेवीनांसूर्यायपु

रोडाशमेककपालंयः सूर्यः सधातासऽउएववषट्कारोदिवेचरुंयाद्यौः सानुमतिः सो
एवगायत्र्युषसेचरुंयोषाः साराकासोऽएवत्रिष्टुब्गवेचरुंयागौः सासिनीवालीसो
एवजगतीपृथिव्यैचरुंयापृथिवीसाकुहूः सोऽएवानुष्टुब्वेतानिवावसर्वाणिछं
दांसिगायत्रंत्रैष्टुभंजागतमानुष्टुभमन्वन्यान्येतानिहियज्ञेप्रतमामिवक्रि
यंतेऽएते ह वाऽअस्यछंदोभिर्यजतः सर्वैश्छंदोभिरिष्टं भवतियऽएवंवेदत
द्वैयदिदमाहुः सुधायांहवैवाजीसुहितोदधातीतिछंदांसिवैतत्सुधायां
हवाऽएनंछंदांसिदधत्यननुध्यायिनंलोकंजयतियऽएवंवेदतद्वैकऽआ
हुः सूर्यमेवसर्वासांपुरस्तात्पुरस्तादाज्येनपरियजेत्तदासुमिथुनंदधाती सर्वासु
तितदु वाऽआहुर्जामिवाऽएतद्यज्ञेक्रियतेयत्रसमानीभ्यामृग्भ्यांसमाने

ग०ल० हन्वजतीतियदिहवाऽअपिबह्व्यइवजायाःपतिर्वाभवतासांमिथुनंतद्यदासांसूर्यं
पुरस्ताद्यजतितदासुसर्वासुमिथुनंदधातितायाइमास्ताऽअमूर्याऽअमूस्ताऽइ
३२ माऽअन्यतराभिर्वावतंकामसमाप्नोतियऽएतासूभयीषुताऽउभयीर्गतश्रियःप्र
जातिकामस्यसन्निर्वपेन्नेलेषिष्यमाणस्ययदेनाऽएषिष्यमाणस्यैंदीश्वरो संनिर्वपे
हास्यवित्तेदेवाऽअरंतोर्यद्वाऽअयमात्मनेऽलममंस्तेतिताहशुचिवृक्षोगौ
पालायनोवृद्धद्युम्नस्याभिप्रतारिणस्योभयीर्यज्ञेसंनिरुवापतस्यहरथ
गृत्संगाहमानंदृष्ट्वोवाचेत्थमहमस्यराजन्यस्यदेविकाश्चदेवीश्चोभयी ३२
र्यज्ञेसममादयंयदस्येत्थंरथगृत्सोगाहतइतिचतुःषष्टिंकवचिनःशश्व
द्धास्यतेपुत्रनप्तारऽआसुः॥५८॥अग्निष्टोमंवैदेवाऽअश्रयंतोक्थान्यसु

रास्तेसमावद्वीर्याऽएवासन्नव्यावर्तंतताम्भरद्वाजऋषीणामपश्यदिमेवाऽअ
सुराउक्थेषुश्रितास्तान्नेषांनकश्चनपश्यतीतिसोग्निमुदह्वयदेहिपुत्रब्रवा
णितेग्नइत्थेतरागिरइत्यसुर्याहवाइतरागिरःसोग्निरुपोत्तिष्ठन्नब्रवीत्किं
स्विदेवमह्यंकृशोदीर्घःपलितोवक्ष्यतीतिभरद्वाजोहवैकृशोदीर्घःपलि
तऽआससोब्रवीदिमेवाऽअसुराउक्थेषुश्रितास्तान्वोनकश्चनपश्यती
तितान्नग्निरश्वोभूत्वाभ्यत्यद्रवद्यदग्निरश्वोभूत्वाभ्यत्यद्रवत्तत्साकम
श्वंसामाभवत्तत्साकमश्वस्यसाकमश्वत्वंतदाहुःसाकमश्वेनोक्था
निप्रणयेदप्रणीतानिवावतान्युक्थानियान्यन्यत्रसाकमश्वादितिप्रमं

हिष्ठीयेनप्रणयेदितिस्माहुः प्रमंहिष्ठीयेनवैदेवाऽअसुरानुक्थेभ्यःप्राणुदंतत
ब्रा॰तृ॰ स्माहैवंप्रमंहिष्ठीयेननयेत्प्रसाकमश्वेन॥४९॥तेवाऽअसुरामैत्रावरुणस्यो
३२ क्थमभ्यश्रयंतसोब्रवीदिंद्रःकश्चाहंचेमानितोसुरान्नोत्स्यावहाइत्यहंचे
त्यब्रवीद्वरुणस्तस्मादैंद्रावरुणंमैत्रावरुणस्तृतीयसवनेशंसतींद्रश्चहि
तान्वरुणश्चततोनुदेतांतेवैततोपहताऽअसुराब्राह्मणाछंसिनऽउक्थ
मभ्यश्रयंतसोब्रवीदिंद्रःकश्चाहंचेमानितोसुरान्नोत्स्यावहाइत्यहंचेत्यब्र
वीद्बृहस्पतिस्तस्मादैंद्राबार्हस्पत्यंब्राह्मणाछंसीतृतीयसवनेशंसतींद्रश्च ३२
हितान्बृहस्पतिश्चततोनुदेतांतेवैततोपहताऽअसुराऽअछावाकस्योक्थ

मभ्यश्रयंतसोब्रवीदिंद्रःकश्चाहंचेमानितोसुरान्नोत्स्यावहाइत्यहंचेत्यब्रवीद्वि
स्तस्मादैंद्रावैष्णवमछावाकस्तृतीयसवनेशंसतींद्रश्चहितान्विष्णुश्च
ततोनुदेतांद्वंद्वमिंद्रेणदेवताःशस्यंतेद्वंद्वंवैमिथुनंतस्माद्वंद्वान्मिथुनं
जायतेप्रजात्यैप्रजायतेप्रजयापशुभिर्यऽएवंवेदाथहैतेपोत्रीयाश्चनें
ष्ट्रीयाश्चचत्वारऋतुयाजाःषळृचःसाविराड्दशिनीतद्विराजियज्ञंदशि
न्यांप्रतिष्ठापयंतिप्रतिष्ठापयंति॥५०॥इतितृतीयपंचिकायांपंचमोध्यायः॥
शके१७२५श्रीमुखासंवत्सरेदक्षिणायनेशरदृतौकार्तिकेमासेशुक्लपक्षे१२
दिनेभृगोव्योपनामगोविंदसुतस्यगणेशानलिखितं॥समाप्तं॥

॥इतितृतीयपंचिकाःसमाप्तं॥

३३